श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकूरनाथश्रीवत्सचिह्नमिश्र विरचितं

# ॥ धाटीपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ धाटीपञ्चकम् ॥

पाषण्डद्रुमषण्डदावदहनश्चार्वाकशैलाशनिः
बौद्धध्वान्तनिरासवासरपतिर्जैनेभकण्ठीरवः।
मायावादिभुजङ्गभङ्गगरुडस्त्रैविद्यचूडामणिः
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनिः॥ 1 ॥

पाषण्डषण्डगिरिखण्डनवज्रदण्डाः
प्रच्छन्नबौद्धमकरालयमन्थदण्डाः।
वेदान्तसारसुखदर्शनदीपदण्डाः
रामानुजस्य विलसन्ति मुनेस्त्रिदण्डाः॥ 2 ॥

चारित्रोद्धारदण्डं चतुरनयपथालङ्क्रियाकेतुदण्डं
सद्विद्यादीपदण्डं सकलकलिकथासंहृतेः कालदण्डम्।
त्रय्यन्तालम्बदण्डं त्रिभुवनविजयच्छत्रसौवर्णदण्डं
धत्ते रामानुजार्यः प्रतिकथकशिरोवज्रदण्डं त्रिदण्डम्॥ 3 ॥

त्रय्यामाङ्गल्यसूत्रं त्रियुगपदयुगारोहणालम्बसूत्रं
सद्विद्यादीपसूत्रं सकलकलिकथासंहृतेः कालसूत्रम्।
प्रज्ञासूत्रं बुधानां प्रशमधनमनः पद्मिनीनालसूत्रं
रक्षासूत्रं मुनीनां जयति यतिपतेर्वक्षसि ब्रह्मसूत्रम्॥ 4 ॥

पाषण्डसागरमहाबडबामुखाग्निः श्रीरङ्गराजचरणांबुजमूलदासः।
श्रीविष्णुलोकमणिमण्डपमार्गदायी रामानुजो विजयते यतिराजराजः॥ 5 ॥

॥ धाटीपञ्चकं समाप्तम्॥